# Shri Navadurgasvarupanusandhana Stuti

# શ્રી નવદુર્ગાસ્વરૂપાનુસન્ધાનસ્તુતિઃ

## Document Information

Text title : Shri Navadurgasvarupanusandhana Stuti

File name : navadurgAsvarUpAnusandhAnastutiH.itx

Category : devii, devI, stuti, durgA

Location : doc_devii

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI. atharvaNa rahasye shrI dakShiNAmUrtisaMhitAyAM vidyAmnAya kalpa

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રી નવદુર્ગાસ્વરૂપાનુસન્ધાનસ્તુતિઃ

વક્ષ્યેઽહં નવ દુર્ગાયાઃ સ્વરૂપાણ્યધુના ક્રમાત્ ।
પ્રથમા વન દુર્ગા સ્યાત્ શૂલિન્યાખ્યા દ્વિતીયિકા ॥ ૧॥

તૃતીયા જાતવેદાસ્તુ શાન્તિદુર્ગા ચતુર્થિકા ।
પઞ્ચમી શબરી દુર્ગા જ્વલદ્ દુર્ગા ચ ષષ્ઠિકા ॥ ૨॥

સપ્તમી લવણાભિખ્યા દીપદુર્ગા તથાઽષ્ટમી ।
નવમી હ્યાસુરી દુર્ગા પ્રોક્તા એતા નવામ્બિકાઃ ॥ ૩॥

પુરા ભણ્ડમહાયુદ્ધે લલિતામ્બાઽટ્ટહાસતઃ ।
આવિર્ભૂતા ઇમા દેવ્યઃ મધ્વાદ્યસુરભીકરાઃ ॥ ૪॥

સ્મરણાદર્ચનાત્તાસાં જપાત્ દુર્ગાણિ માનવાઃ ।
તરન્તિ તરસા નાન્યો હ્યુપાયોઽસ્તિ કલૌ યુગે ॥ ૫॥

દુઃખેન શત્રુભિર્ગન્તુમશક્યત્વાત્ યતોઽમ્બિકા ।
દુર્ગેતિ કથિતા શમ્ભું સમરોદ્યુક્તમાશ્રિતા ॥ ૬॥

દુર્ગાત્ સન્ત્રાયતે યસ્માત્ દેવી દુર્ગેતિ કથ્યતે ।
પ્રપદ્યે શરણં દેવિ ચેત્યાહાથર્વણી શ્રુતિઃ ॥ ૭॥

આક્રીડાયાં ભવાની સા શમ્ભોઃ કોપે તુ કાળિકા ।
જગતાં પાલને વિષ્ણુઃ યુદ્ધે દુર્ગા શિવપ્રિયા ॥ ૮॥

સમષ્ટિ વ્યષ્ટિ ભેદેન દ્વિધા તન્મૂર્તિરીરિતા ।
સમષ્ટિરેવ સર્વત્ર પૂજ્યતે હિ દ્વિજાતિભિઃ ॥ ૯॥

વિખ્યાતા સર્વદા દુર્ગા મહિષાસુરમર્દિની ।
સમષ્ટિરૂપિણી દેવી નવદુર્ગાત્મિકા શિવા ॥ ૧૦॥

વિન્ધ્યદર્પવિનાશાર્થમગસ્ત્યેન વને પુરા ।
યા દુર્ગા પૂજિતા તસ્માત્ વનદુર્ગેતિ કીર્તિતા ॥ ૧૧॥

ત્રિપુરાણાં મહાયુદ્ધે વહન્તી શૂલમાયુધમ્ ।
શમ્ભોઃ વામગતા દુર્ગા તસ્માત્ સા શૂલિની મતા ॥ ૧૨॥

જાતવેદઃ સ્વરૂપા યા ગઙ્ગાં નયતિ શામ્ભવમ્ ।
વીર્યં તસ્માત્ જાતવેદોદુર્ગેતિ પ્રથિતા ભુવિ ॥ ૧૩॥

ઋણરોગપિશાચાદિ સર્વોપદ્રવ નાશનાત્ ।
રુદ્રકોપપ્રશમનાત્ શાન્તિ દુર્ગેતિ કીર્તિતા ॥ ૧૪॥

યા પાર્થસ્યાનુગ્રહાર્થં શબરાત્માનમીશ્વરમ્ ।
પુરા વને હ્યનુગતા તસ્માત્સા શબરી મતા ॥ ૧૫॥

રક્ષાર્થં શક્તિસેનાસ્તાઃ પુરા ભણ્ડાસુરાહવે ।
અભિજજ્વાલ શિબિરં જ્વલદ્ દુર્ગા તતો મતા ॥ ૧૬॥

લવણાસુર સંહૃત્યૈ લક્ષ્મણેન સમર્ચિતા ।
યા પુરા રામવિનુતા સા દુર્ગા લવણાભિધા ॥ ૧૭॥

હાર્દાન્ધકારં યા દુર્ગા વારયન્ત્યાશુ યોગિનામ્ ।
દીપવત્તિમિરં સા સ્યાત્ દીપદુર્ગા સુખપ્રદા ॥ ૧૮॥

અસુરાન્ મોહયન્તી યા પુરાઽયચ્છત્ સુધારસમ્ ।
સુરેભ્યઃ સાઽઽસુરી દુર્ગા કીર્તિતા સર્વસિદ્ધિદા ॥ ૧૯॥

સમષ્ટિદુર્ગા
અરિશઙ્ખકૃપાણ ખેટ બાણાન્સધનુશ્શૂલક તર્જનીર્દધાના ।
મમ સા મહિષોત્તમાઙ્ગસંસ્થા નવદુર્ગાસદૃશી શ્રિયેઽસ્તુ દુર્ગા ॥ ૨૦॥

૧. વનદુર્ગાધ્યાનમ્ ।
સૌવર્ણામ્બુજ મધ્યગાં ત્રિનયનાં સૌદામિની સન્નિભાં
    શઙ્ખં ચક્રવરાભયાનિ દધતીમિન્દોઃ કલાં બિભ્રતીમ્ ।
ગ્રૈવેયાઙ્ગદ હાર કુણ્ડલધરામાખણ્ડલાદ્યૈઃ સ્તુતાં
    ધ્યાયેદ્વિન્ધ્યનિવાસિનીં શશિમુખીં પાર્શ્વસ્થપઞ્ચાનનામ્ ॥ ૨૧॥

૨. શૂલિનીદુર્ગાધ્યાનમ્ ।
અધ્યારૂઢાં મૃગેન્દ્રં સજલજલધરશ્યામળાં હસ્ત પદ્મૈઃ
    શૂલં બાણં કૃપાણીમરિજલજગદાચાપપાશાન્વહન્તીમ્ ।
ચન્દ્રોત્તંસાં ત્રિનેત્રાં ચતસૃભિરસિના ખેટકં બિભ્રતીભિઃ
    કન્યાભિઃ સેવ્યમાનાં પ્રતિભટભયદાં શૂલિનીં ભાવયામિ ॥ ૨૨॥

૩. જાતવેદોદુર્ગાધ્યાનમ્ ।

વિદ્યુદ્દામસમપ્રભાં મૃગપતિસ્કન્ધસ્થિતાં ભીષણાં
    કન્યાભિઃ કરવાળખેટવિલસદ્ધસ્તાભિરાસેવિતામ્ ।
હસ્તૈશ્ચક્રધરાસિખેટ વિશિખાન્ પાશાઙ્કુશૌ તર્જનીં
    બિભ્રાણામનલાત્મિકાં શશિધરાં દુર્ગાં ત્રિનેત્રાં ભજે ॥ ૨૩॥

૪. શાન્તિદુર્ગાધ્યાનમ્ ।

રોગોપદ્રવ શત્રુભીતિ વિવિધ ક્રૂરાહિ શૂકોલ્બણોદ્-
    દુષ્ટારિષ્ટપિશાચજા બહુવિધાસ્તા આપદો હ્યામયાઃ ।
યદ્ધ્યાનાત્પ્રશમં પ્રયાન્તિ સહસા સા શાન્તિદુર્ગાઽવતાત્
    હસ્તાશ્લિષ્ટવરત્રિશૂલ કમલાભીતિર્મૃગેન્દ્રાસના ॥ ૨૪॥

૫. શબરીદુર્ગાધ્યાનમ્ ।

ગુઞ્જાફલાકલ્પિત હારરમ્યાં શ્રુત્યોઃ શિખણ્ડં શિખિનો વહન્તીમ્ ।
કોદણ્ડબાણૌ દધતીં કરાભ્યાં કટિસ્થવલ્કાં શબરીં સ્મરામિ ॥

૬. જ્વલદ્દુર્ગાધ્યાનમ્ ।

જ્વાલામાલાવલીઢા જ્વલનશરધનુશ્શઙ્ખચક્રાસિખેટાન્
    શૂલં સન્તર્જનીં યા કરસરસિરુહૈસ્સન્દધાના ત્રિનેત્રા ।
ઔર્વાગ્નિં સઙ્કિરન્તી રણભુવિ દિતિજાન્નાશયન્તી પરા સા
    દુર્ગા જાજ્વલ્યમાના ભવતુ મમ સદા સિંહસંસ્થા પુરસ્તાત્ ॥ ૨૬॥

૭. લવણદુર્ગાધ્યાનમ્ ।

કરકમલ વિરાજચ્ચક્રશઙ્ખાસિશૂલા
    પરિલસિતકિરીટા પાટિતાનેકદૈત્યા ।
ત્રિનયનલસિતાઙ્ગી તિગ્મરશ્મિપ્રકાશા
    પવનસખનિભાઙ્ગી લાવણી પાતુ દુર્ગા ॥ ૨૭॥

૮. દીપદુર્ગાધ્યાનમ્ ।

દીપાન્તર્જ્વલિતારવિન્દસદૃશા સિંહાસનસ્થા શિવા
    શૂલેષ્વાસશરારિ શઙ્ખ કમલાભીતીષ્ટ હસ્તોજ્જ્વલા ।
સમ્પૂજ્યાઽમરલોક વાસિભિરસાવાખેલયન્તી મુદા
    સ્વાભાદીપ્તનિશા મહેશરમણી દુર્ગામ્બિકા રક્ષતાત્ ॥ ૨૮॥

૯. આસુરીદુર્ગાધ્યાનમ્ ।

શરચ્ચન્દ્રકાન્તિર્વરાભીતિશૂલાન્ સૃણિં હસ્તપદ્મૈર્દધાનાઽમ્બુજસ્થા ।
વિભૂષામ્બરાઢ્યાઽહિયજ્ઞોપવીતા મુદોઽથર્વપુત્રી કરોત્વાસુરી નઃ ॥ ૨૯॥

સમષ્ટિસ્તુતિઃ ।
નવીકૃતાકારધરાઽપિ યાઽનવીકૃતાઽવિકારાપિ વિકારરૂપિણી ।
વિસર્ગરૂપાઽપ્યવિસર્ગરક્ષણોન્મુખી સદા રક્ષતુ સા નવાત્મિકા ॥ ૩૦॥

દુર્ગે શૂલિનિ જાતવેદસિ મહાશાન્ત્યાહ્વયે શાબરિ
    જ્વાલાદુર્ગવરાભિધે લવણગે દીપાભિધે હ્યાસુરિ ।
એહ્યમ્બે પુરતો મમાદ્ય ભયકૃદ્રોગારિ પીડાદિમાન્
    વિધ્વસ્તાન્ કુરુ દેહિ સૌખ્યમતુલં ભક્તિં તથાઽવ્યાહતામ્ ॥ ૩૧॥

ફલાશંસનમ્ ।
નવદુર્ગાસ્વરૂપાનુસન્ધાયકમનુત્તમમ્ ।
ઇદં સ્તોત્રવરં નિત્યં યઃ પઠેત્ સર્વસિદ્ધિદમ્ ॥ ૩૨॥

ત્રિકાલં હ્યેકકાલં વા સઙ્ક્રાન્તાવયને તથા ।
વિષૌ દર્શે પૌર્ણમાસ્યામષ્ટમ્યાં ભૌમવાસરે ॥ ૩૩॥

શુક્રવારે ચતુર્દશ્યાં રોહિણ્યાં વા વિશેષતઃ ।
કૃષ્ણાઙ્ગારચતુર્દશ્યાં ભૌમાશ્વિન્યાં પઠેદિદમ્ ॥ ૩૪॥

મહામૃત્યું ચ તરતિ મહાદુર્ગાણિ શીઘ્રતઃ ।
નિશીથિન્યાં જપેદેતત્ વાક્સિદ્ધિરપિ લભ્યતે ॥ ૩૫॥

સર્વાન્ કામાનવાપ્નોતિ સર્વસિદ્ધિઞ્ચ વિન્દતિ ।
અત્યુત્પાતભયે જાતે રોગોપદ્રવસમ્ભવે ॥ ૩૬॥

ઋણે બન્ધે ચ યો ધીમાન્ નવદુર્ગાં હૃદિ સ્મરન્ ।
પઠેદાશુ સુખં યાતિ મહાદેવ્યાઃ પ્રસાદતઃ ॥ ૩૭॥

ગોપનીયમિદં સ્તોત્રં નાત્ર કાર્યા વિચારણા ।
નવદુર્ગા મહાવિદ્યા નવધા હ્યુદ્ધૃતાશ્ચ તાઃ ॥ ૩૮॥

જપિત્વાઽન્તે પઠેદેતત્ સ્તોત્રં તસ્યાણિમાદયઃ ।
વશં યાન્તિ ન સન્દેહો નવદુર્ગા પ્રસીદતિ ॥ ૩૯॥

એવં યો હૃદિ ભાવયન્ સ્તુતિમિમાં સઙ્કીર્તયન્ પ્રત્યહં
    મન્ત્રાણાં નવકં નવાકૃતિધરાં દુર્ગામુપાસ્તે શિવામ્ ।

સંયાત્યાશુ મનો વિચિન્તિતફલં સન્તાનસત્સમ્પદઃ
  કાન્તાભૂધનધાન્યવર્ગમતુલાં પુષ્ટિં ચ નિર્વૈરતામ્ ॥ ૪૦॥

(અથર્વણ રહસ્યે શ્રી દક્ષિણામૂર્તિસંહિતાયાં વિદ્યામ્નાય કલ્પતઃ)

ઇતિ શ્રી નવદુર્ગાસ્વરૂપાનુસન્ધાનસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Navadurgasvarupanusandhana Stuti*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*